# मल्लः मातेवः च

## आमुखम्

छात्राः कथाश्रवणे अतीव तत्पराः एव। कथाः सर्वदा आह्लाददायिकाः भवन्ति। छात्राः प्रायः प्रादेशिकभाषायां बहवः कथाः श्रुतवन्तः स्युः। पाठेऽस्मिन् छात्रैः श्रुता एका लघुकथा दत्ता अस्ति। इयं कथा कः यथार्थः सुहृद् इति अस्मान् बोधयति। चित्राणां साहाय्येन आशयम् अवगन्तुं शक्यते इत्यतः कथास्वादने छात्राः क्लेशं न अनुभवेयुः।

आपत्काले च संप्राप्ते यन्मित्रं मित्रमेव च।
वृद्धिकाले तु संप्राप्ते दुर्जनोऽपि सुहृद्भवेत्।।

यः अस्माभिः साकम् आपत्कालेऽपि तिष्ठति सः एव उत्तमः सुहृद् भवति। वृद्धिकाले आगते सति दुर्जनाः अपि मित्राणि भवन्ति।

पाठनाम - मल्लः मातेवः च।

कालांशः -१२

उद्देश्यम् - परस्परसाहाय्यं सामूहिकजीवने अत्यन्तमपेक्षितम्।

नैपुणी - समानार्थकपदानां चयनं, क्रमीकरणं च।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| परस्परस्नेहः सामूहिकजीवने अत्यन्तमपेक्षितः। मित्राणि सन्मार्गदर्शकाः भवन्ति। मित्राणां चयने श्रद्धा करणीया। कथा | कथास्थंभक्रमीकरणम्। संभाषणरूपेण प्रकटनम्। समानपदचयनम्। | मित्रसंबन्धीः कथाः पठति। मित्राणां महत्वं, प्रयोजनं च अवगच्छति। परस्परसाहाय्यं आवश्यकम् इति बोधः जायते। समानार्थकपदानि, विवच्य जानाति। कथां पठित्वा स्तम्भं क्रमीकरोति। |

कः उत्तमः सुहृद् इति पाठेऽस्मिन् सूचयति। छात्र! भवतां सर्वेषां मित्राणि सन्ति किल? अस्माकं मित्राणि सर्वे उत्तमाः, ते सर्वदा अस्माभिः साकं भवन्ति। व्यसने, सन्तोषे च यः अस्माभिः सह वर्तते सः एव उत्तमः सखा। एवं सौहृदस्य महत्वम् अध्यापकः छात्रान् बोधयति।वयम् इदानीं द्वयोः मित्रयोः कथां परिचिनुमः इत्युक्त्वा पाठभागं प्रविशति।

**कथायाः अवतारणम्।**

अध्यापकः पाठपुस्तकस्थां कथां साभिनयं कक्ष्यायाम् अवतारयतु। आशयविशदीकरणमपि ददातु। श्रवणानन्तरम् अध्यापकसाहाय्येन मातृभाषया कथनाय छात्रान् प्रेरयति। पश्चात् अध्यापकः पाठपुस्तके दत्तम् एकैकमपि वाक्यं द्विवारम् उच्चैः पठति। आशयं विशदयति, छात्रान् अनुवाचनाय प्रेरयति च।

**मूल्यनिर्णयसूचिकाः।**

आशयं वदति।

स्फुटतया अनुवाचयति।

अक्षराणि प्रत्यभिजानाति।

**प्रवर्तनम् - १ - समानपदचयनम्।**

**उद्देश्यम्- पदज्ञानम्, अर्थज्ञानं च।**

अध्यापकः पाठपुस्तकस्थानि पदानि चार्ट्पत्रे विलिख्य कक्ष्यायां प्रदर्शयतु। पदानामेतेषां समानार्थकपदानि पाठपुस्तकं दृष्ट्वा रेखया अङ्कनाय निर्दिशति। रेखाङ्कितानां पदानां कक्ष्यायाम् अवतारणाय, अवतारणानन्तरं लेखनाय च निर्दिशति।

**मूल्यनिर्णयसूचीकाः।**

पदपरिचयः ।

समानपदज्ञानम्।

**प्रवर्तनम् २ - कथास्तम्भक्रमीकरणम्।**

**उद्देश्यम्- आशयमवगम्य कथाक्रमीकरणम्।**

कथास्तम्भक्रमीकरणात् पूर्वम् अध्यापकः केषाञ्चन छात्राणां समीपं पाठपुस्तकस्थां कथां प्रादेशिकभाषया कथनाय निर्दिशति। पाठपुस्तके दत्तं कथास्तम्भक्रमीकरणम् अध्यापकः द्वित्रवारम् उच्चैः पठति, आशयं कथयति च। आशयं साभिनयं प्रदर्शयति। पाठपुस्तकं दृष्ट्वा तेषां क्रमीकरणाय निर्दिशति। अध्यापकः उचितं साहाय्यं करोतु।

**मूल्यनिर्णयसूचिकाः।**

उचितं क्रमीकरणम्।

अक्षरपदवाक्यज्ञानम्।

कथायाः आशयावगमः ।

**प्रवर्तनम् ३- वाक्यपूरणम्।**

**उद्देश्यम् - उचितपदानि योजयित्वा वाक्यलेखनम्।**

अध्यापकः पुस्तके दत्तानि चित्राणि कक्ष्यायां प्रदर्श्य परिचाययति।(गृहम्,शुनकः,मार्जारः,अजः) अनन्तरं तानि उपयुज्य वाक्यपूरणाय निर्दिशति।

यथा -

अनूपः मम मित्रं भवति। मित्रस्य **गृहं** ग्रामे अस्ति। तस्य गृहे एकः **शुनकः** अस्ति। मम गृहे **मार्जारः, अजः** च अस्ति।

**मूल्यनिर्णयसूचिकाः।**

चित्र-पदपरिचयः।

वाक्ययोजनम्।

**अनुबन्धप्रवर्तनानि।**

**चित्रनिरीक्षणम्।**

**उद्देश्यम् - चित्रद्वारा आशयावगमनम्।**

पाठपुस्तकस्थं चित्रं सम्यग् निरीक्षन्तां छात्राः। चित्रे किं किम् अस्ति इति कथनाय अध्यापकः छात्रान् निर्दिशति। तदर्थं सहायकरूपेण प्रश्नान् पृच्छति। यथा - चित्रे किं किम् अस्ति? बालकौ किं कुरुतः? तौ कुत्र गच्छतः? तौ कं पश्यतः? इत्यादयः। चित्रं निरीक्ष्य छात्राः मातृभाषया उत्तराणि वदन्ति।

**संभाषणरूपेण अवतारणम्।**

छात्रान् त्रयङ्गसंघान् करोतु, छात्राः नाटकावतारणाय सज्जाः भवन्तु यथा- छात्रेषु एकः मल्लस्य, द्वितीयः मातेवस्य, तृतीयः भल्लूकस्य च भागं गृह्णातु। प्रवर्तने अध्यापकस्य उचितं साहाय्यम् आवश्यकम्। प्रथमम् अध्यापकः कञ्चित् भागम् अवतार्य प्रदर्शयतु। मातृभाषया संभाषणं कुर्वन्तु छात्राः। प्रतिसंघम् अवतारणाय अवसरः दातव्यः।

**मूल्यनिर्णयसूचिकाः।**

सभाकम्पं विना अवतारणम्।

उचितं संभाषणम्।

कथायाः आशयावगमः।

**परिचितपदचयनम्।**

अध्यापकः पाठपुस्तकम् उच्चैः पठति। अनन्तरं पाठपुस्तके प्रादेशिकभाषायां सुपरिचितानि पदानि सन्ति वा इति पृच्छति। तानि चित्वा उच्चैः पठनाय निर्दिशति। छात्रैरुक्तानि श्यामफलके लिखतु अध्यापकः। उदा - वनम्, मित्रम्, मार्गः ...। ततः पदानि टिप्पणीपुस्तके लिखन्तु छात्राः।

**मूल्यनिर्णयसूचिकाः।**

पदपरिचयः।

अक्षराभिज्ञानम्।

अन्तर्जालिकायां विविधजीविनां मुखचित्राणि सुलभान्येव। तानि स्वीकृत्य छद्‌ममुखानि(Mask) निर्माय पात्रावतारणं (Role play) करोतु। अन्तर्जालिकाया( Internet) जालस्थाने (Website) चित्राणि लभन्ते।(अनुबन्धम् - १)